# B-231090-C

## विषय : संस्कृत

समय : 3 घण्टे ]

[ पूर्णांक : 75

***निर्देश*** : (*i*) **सर्वे प्रश्नाः समाधेयाः।**

(*ii*) **उत्तराणि सुन्दराणि सुस्पष्टानि च भवेयुः।**

---

**प्रश्न-1** अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारेण प्रदत्तप्रश्नानाम् उत्तराणि लिखत— [1×3=3]

कालान्तरे बिलासायाः विवाहः बंशी नाम्ना युवकेन सह अभवत्। बिलासा प्रतिदिनं 'चार-तेन्दू' इति वन्यफलानि संग्रहणार्थं गच्छति स्म। तथा च बंशी महिषचारणाय वनं प्रति अगच्छत्। यदा सायंकाले बिलासा मत्या साकं गृहं प्रति न्यवर्तयति स्म तदा सहसा आखेटाय भ्रमतः राज्ञः कल्याणसायस्योपरि एकः व्याघ्रः आक्रमणं कृतवान्।

*प्रश्नाः*

(*क*) ''बिलासायाः विवाहः बंशी नाम्ना युवकेन सह अभवत्।'' इत्यस्य हिन्दीभाषया अनुवादं कुरुत।

(*ख*) ''गच्छति स्म'' इति क्रियापदस्य कर्तृपदं किम् अस्ति?

(*ग*) ''भ्रमतः राज्ञः'' इत्यनयोः पदयोः विशेषणपदं किम् अस्ति?

**प्रश्न-2** अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारेण प्रदत्तप्रश्नानाम् उत्तराणि लिखत— [1×3=3]

अपि च किं मङ्गले जीवनम् आसीत् आहोस्वित् भविष्यति वा? तस्याधारस्य, संरचनायाः, वातावरणस्य तत्रस्थाः ये खनिजपदार्थाः तस्याध्ययनम्। किं मङ्गलग्रहे जलस्य अस्तित्वम् आसीत्? किमत्र रक्तग्रहे मीथेन अस्ति वा न वा, यतः तस्य अस्तित्वमेव जैविकं क्रियाकलापं निर्दिशति। एते प्रश्नाः अपि शोधनीयाः।

*प्रश्नाः*

(क) "अपि च किं मङ्गले जीवनम् आसीत् आहोस्वित् भविष्यति वा?" इत्यस्य वाक्यस्य हिन्दीभाषया अनुवादं कुरुत।

(ख) "ये खनिजपदार्थाः तस्य अध्ययनम्" इत्यत्र रेखाङ्कितपदयोः विशेष्यपदं किम्?

(ग) गद्यांशे 'रक्तग्रहे' इति शब्दः कस्य ग्रहस्य कृते प्रयुक्तः?

**प्रश्न-3** अधोलिखितं श्लोकं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि लिखत— [1×3=3]

रात्रिर्गमिष्यति भविष्यति सुप्रभातम्,
भास्वानुदेष्यति हसिष्यति पंकजश्रीः।
**इत्थं विचिन्तयति कोशगते द्विरेफे,**
**हा हन्त! हन्त! नलिनीं गज उज्जहार॥**

*प्रश्नाः*

(क) 'सुसंध्या' इति पदस्य विलोमपदं श्लोके किं प्रयुक्तम्?

(ख) 'सूर्यः' इत्यस्य पर्यायपदं श्लोकात् चित्वा लिखत।

(ग) 'हसिष्यति' इति क्रियापदस्य कर्तृपदं किम्?

**प्रश्न-4** अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत— [1×3=3]

तपः किं लक्षणं प्रोक्तं,
को दमश्च प्रकीर्तितः।
क्षमा च का परा प्रोक्ता,
का च ह्री परिकीर्तिता॥

*प्रश्नाः*

(क) "तपः किं लक्षणं प्रोक्तम्" इत्यस्य हिन्दीभाषया अनुवादं कुरुत।

(ख) "क्षमा च का परा प्रोक्ता" इत्यत्र क्रियापदं किम् अस्ति?

(ग) "का च ह्रीः" इत्यत्र विशेषणपदं किम्?

प्रश्न-5 अधोलिखितरेखाङ्कितपदानां समासविग्रहं कृत्वा तेषां नामन्यपि लिखत— [1×3=3]

(क) रे मानव! अधि हरि यतस्व।

(ख) सः पीताम्बरः वटुः शोभते।

(ग) तापसः ओङ्कारं संजप्य पापमुक्तः अभवत्।

प्रश्न-6 अधोलिखितसंवादांशात् त्रीणि अव्ययपदानि चित्वा लिखत— [1×3=3]

(क) रणधीरः — प्रातःकाले भ्रमणं मह्यम् अपि रोचते।

(ख) रणवीरः — तर्हि भवान् चलतु।

(ग) रणधीरः — बाढम्। अहमपि चलामि।

प्रश्न-7 अधोलिखितानि वाक्यानि संशोधयत— [1×3=3]

(क) छात्रः ग्रामेण विद्यालयम् आगच्छति।

(ख) वैद्यः रुग्णं ज्वरौषधिं ददाति।

(ग) अहं ह्यः गमिष्यामि।

प्रश्न-8 अधोलिखितानां प्रश्नानामुत्तराणि संस्कृतभाषया लिखत— [1×4=4]

(क) भारत्यै किम् अतीव रोचते?

(ख) कः चन्दनदासं द्रष्टुमिच्छति?

(ग) संसारे कानि-कानि चक्रवत् परिवर्तन्ते?

(घ) कः देशः स्वकीये प्रथमप्रयासे मंगलग्रहकक्षम् अलभत्?

*अथवा*

अधोलखितेषु वाक्येषु रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत—

(क) प्राणेभ्योऽपि प्रियः सुहृद्।

(ख) चौरस्य पादध्वनिना अतिथिः प्रबुद्धः।

(ग) उभौ शवं चत्वरे स्थापितवन्तौ।

(घ) स्वामिनः आत्मानन्दस्य बाल्यकालस्य नाम तुलेन्द्रः आसीत्।

**प्रश्न-9** अधोलिखितानां प्रश्नानामुत्तराणि हिन्दीभाषया लिखत—

(क) शृगालः वधूं किं निर्देशितवान् ?

(ख) किं पर्व आसन्नं वर्तते ?

(ग) मंगलयानं कुतः विमुक्तम् ?

(घ) कीदृशः परिवारः वरम् अस्ति ?

*अथवा*

अधोलिखितानां प्रश्नानामुत्तराणि हिन्दीभाषया लिखत—

(क) संस्कृते महर्षिभिः किं प्रोक्तम् ?

(ख) सूर्यः चन्द्रश्च ओदनस्य कौ स्तः ?

(ग) हेमन्ते दिवसाः कीदृशाः भवन्ति ?

(घ) सर्वत्र के न भवन्ति ?

**प्रश्न-10** स्वपाठ्यपुस्तकात् चतस्रः सूक्तीः लिखत, याः प्रश्नपत्रेऽस्मिन् नागताः स्युः। [1x4]

*अथवा*

अधः प्रदत्तसूक्तीनां हिन्दीभाषया भावार्थं लिखत—

(क) अलसस्य कुतो विद्या।

(ख) गतस्य शोचनं न करणीयम्।

(ग) न्याय्यात् पथः प्रविचलन्ति पदं न धीराः।

(घ) मनः पूतं समाचरेत्।

**प्रश्न-11** स्वपाठ्यपुस्तकात् कौचित् द्वौ सुभाषितश्लोकौ लिखत, यौ प्रश्नपत्रेऽस्मिन् न समायातौ स्तः।

[2½x2=5]

*अथवा*

अधः द्वौ अपूर्णौ सुभाषितश्लोकौ प्रदीयते, तौ श्लोकौ स्वपाठ्यपुस्तकाधारेण पूरयत—

(क) केषाञ्चिदपि ——— ।

——— हस्तेषु क्षुरिका यथा॥

(ख) उद्यमः साहसं ——— ।

——— सहायकृत्॥

प्रश्न-12 (अ) भवत: नाम दिवाकर: सिदार: अस्ति। भवत: विद्यालयस्य नाम शासकीय: उच्चतर: माध्यमिक: विद्यालय: पुसौर: अस्ति। स्वस्य अपरिहार्यकारणवशात् (किमपि) त्रिदिनात्मकम् अवकाशस्य हेतो: स्वप्राचार्यं प्रति एकम् आवेदनपत्रं लिखतु। {1+2+1=4}

**अथवा**

भवत: नाम दीपेश: अस्ति। भवान् अधोलिखितां मञ्जूषां दृष्ट्वा शुल्कमुक्त्यर्थं लिखिते अस्मिन् पत्रे रिक्तस्थानानि पूरयन् पूर्णम् आवेदनपत्रं लिखतु।

[आशासे, पञ्चम्यां, पञ्चसहस्ररूप्यकाणि, निवेदनम्, अनुग्रहीष्यति, निर्वाह:, शुल्कमुक्तये, छात्र:]

**सेवायाम्**

**प्राचार्य:**

**शासकीय-उच्चतर-माध्यमिक**

**विद्यालय: जगदलपुरम् (छत्तीसगढम्)**

विषय: (*i*) -------- प्रार्थनापत्रम्।

महोदय!

सविनयं (*ii*) -------- अस्ति यदहं भवत: विद्यालये दशमकक्षाया: (*iii*) -------- अस्मि। मम पिता एक: कृषक: अस्ति। तस्य मासिक: आय: (*iv*) -------- अस्ति। मम एक: भ्राता अष्टमकक्षायां भगिनी च (*v*) -------- कक्षायां पठति। अस्माकं कुटुम्बस्य (*vi*) -------- अतीव काठिन्येन भवति।

अत: शुल्कमुक्त्यर्थं प्रार्थयेऽहम्। (*vii*) -------- अत्र भवान् मम एतां प्रार्थनां स्वीकृत्य (*viii*) --------।

दिनाङ्क: — / — / —

भवत: विनीत: शिष्य:

दीपेश:

कक्षा-दशमी

(ख) अधोलिखितम् अपठितांशं पठित्वा निर्देशानुसारेण संस्कृतभाषया उत्तरत—

जनानां लोकानां वा तन्त्रं शासनं जनतन्त्रं वा कथ्यते। लोकतन्त्रे जनानां कल्याणम् एव शासनस्य प्रमुखं कार्यं मन्यते। अत्र प्रत्येकस्य जनस्य एव महत्त्वम्। भाषणे लेखने च अत्र पूर्णं स्वातन्त्र्यं भवति।

व्यवहारे केचन दोषाः अपि दृश्यन्ते। एतेषां दोषाणां दूरीकरणम् अनिवार्यम्। एतदर्थं सर्वेभ्यः शिक्षा अनिवार्या। शिक्षां विना लोकतन्त्रं सुरक्षितं न भवति।

*प्रश्नाः* [1×4=4]

(क) कां विना लोकतन्त्रं सुरक्षितं न भवति ?

(ख) लोकतन्त्रे शासनस्य किं प्रमुखं कार्यं मन्यते ?

(ग) लोकतन्त्रे किमर्थं शिक्षा अनिवार्या ?

(घ) किं नाम लोकतन्त्रम् ?

***अथवा***

(क) संस्कृतभाषया सारांशं लिखत। [3]

(ख) अपठितगद्यांशस्य उचितं शीर्षकं लिखत। [1]

**प्रश्न–13** अधः प्रदत्तविषयेषु कमपि एकमधिकृत्य संस्कृतभाषया द्वादशवाक्यैः निबन्धं लिखत— [½×12=6]

(क) सदाचारः

(ख) महाकविः कालिदासः

(ग) मम प्रदेशः (छत्तीसगढः)

(घ) ग्राम्यजीवनम्

**प्रश्न–14** निम्नलिखितयोः अङ्कयोः अनुवादं संस्कृतभाषया कुरुत— [1×2=2]

(क) एक सौ अड़तालीस (148)

(ख) एक सौ छः (106)

**प्रश्न–15** निम्नलिखितयोः रेखाङ्किकतपदयोः सन्धिविच्छेदं कृत्वा तयोः नाम्नी लिखत— [1×2=2]

(क) नदीषु <u>विमलं जलं राजते</u>।

(ख) संस्कृतेन भारतस्य <u>यशोगानं</u> जायते।

**प्रश्न-16** यथानिर्देशम् वाच्यं परिवर्तयत— [1×2=2]

(क) अनुजः पाठं पठति। (कर्मवाच्ये)

(ख) त्वया अहं दृश्ये। (कर्तृवाच्ये)

**प्रश्न-17** निम्न रेखाङ्कितयोः प्रकृतिं प्रत्ययं च योजयित्वा वाक्यं पूर्णं लिखत— [1×2=2]

(क) गङ्गानद+ई (ङीप्) पुण्यजला अस्ति।

(ख) छात्राः पुस्तकानि अधि+इ+ल्यप् पाठं स्मरन्ति।

**प्रश्न-18** (अ) उचितं विकल्पं चित्वा लिखत— [1×5=5]

(i) तक्रं पिबेत्—

(क) दिनान्ते (ख) निशान्ते

(ग) कार्यान्ते (घ) भोजनान्ते

(ii) "अत्यादरः शङ्कनीयः।" इति कथनम् अस्ति—

(क) चाणक्यस्य (ख) चन्दनदासस्य

(ग) शिष्यस्य (घ) महाराजस्य

(iii) "अपि तुभ्यं कारवेल्लं न रोचते?" इत्यत्र रेखाङ्कितपदस्य विभक्तिः अस्ति—

(क) द्वितीया (ख) तृतीया

(ग) चतुर्थी (घ) पञ्चमी

(iv) "'कविः' इति शब्दः अजन्तः अस्ति।" इत्यत्र रेखाङ्कितपदस्य समुचितसन्धिविच्छेदो वर्तते—

(क) अच् + अन्तः (ख) अज् + अन्तः

(ग) अ + जन्तः (घ) अजन् + तः

(v) "दुष्टः सज्जने अपि प्रहरति।" इत्यत्र रेखाङ्किते पदेऽस्ति—

(क) प्र-धातुः (ख) प्र-प्रत्ययः

(ग) प्र-धात्वंशः (घ) प्र-उपसर्गः

**( ब )** उचितं विकल्पं चित्वा रिक्तस्थानानि पूरयत वाक्यं पुनः लिखत—

( श्रुतम्, कामये, अहम्, रोचताम्, षष्ठी )

(i) —— संस्कृतं पठामि।

(ii) छात्रेभ्यः संस्कृतभाषा ——।

(iii) 'भवताम्' इति पदे —— विभक्तिः अस्ति।

(iv) प्राणिनाम् आर्तिनाशनं ——।

(v) धनानाम् उत्तमं ——।

**( स )** स्तम्भस्य सुमेलनं कुरुत—

| **( क )** | | **( ख )** |
|---|---|---|
| (i) लौकिकः | - | बस्तरे |
| (ii) धनात् ऋते | - | लट् लकारस्य बहुवचनम् |
| (iii) वर्तध्वे | - | अदितिः |
| (iv) तीरथगढ़प्रपातः | - | ठक् |
| (v) देवानां माता | - | न सुखम् |

———